# ॥ वाल्मीकि रामायण॥

## १ बालकाण्ड

### अध्याय ३

श्रुत्वा वस्तु समग्रं तद्धर्मात्मा धर्मसंहितम् ।
व्यक्तमन्वेषते भूयो यद्वृत्तं तस्य धीमतः ॥ १॥

उपस्पृश्योदकं संयन्मुनिः स्थित्वा कृताञ्जलिः ।
प्राचीनाग्रेषु दर्भेषु धर्मेणान्वेषते गतिम् ॥ २॥

जन्म रामस्य सुमहद्वीर्यं सर्वानुकूलताम् ।
लोकस्य प्रियतां क्षान्तिं सौम्यतां सत्यशीलताम् ॥ ३॥

नानाचित्राः कथाश्चान्या विश्वामित्रसहायने ।
जानक्याश्च विवाहं च धनुषश् च विभेदनम् ॥ ४॥

रामरामविवादं च गुणान्दाशरथेस्तथा ।
तथाभिषेकं रामस्य कैकेय्या दुष्टभावताम् ॥ ५॥

व्याघातं चाभिषेकस्य रामस्य च विवासनम् ।
राज्ञः शोकं विलापं च परलोकस्य चाश्रयम् ॥ ६॥

प्रकृतीनां विषादं च प्रकृतीनां विसर्जनम् ।
निषादाधिपसंवादं सूतोपावर्तनं तथा ॥ ७॥

गङ्गायाश्चाभिसन्तारं भरद्वाजस्य दर्शनम् ।
भरद्वाजाभ्यनुज्ञानाच्चित्रकूटस्य दर्शनम् ॥ ८॥

वास्तुकर्मनिवेशं च भरतागमनं तथा ।
प्रसादनं च रामस्य पितुश्च सलिलक्रियाम् ॥ ९॥

पादुकाग्र्याभिषेकं च नन्दिग्राम निवासनम् ।
दण्डकारण्यगमनं सुतीक्ष्णेन समागमम् ॥ १०॥

अनसूयासमस्यां च अङ्गरागस्य चार्पणम् ।
शूर्पणख्याश्च संवादं विरूपकरणं तथा ॥ ११॥

वधं खरत्रिशिरसोरुत्थानं रावणस्य च ।
मारीचस्य वधं चैव वैदेह्या हरणं तथा ॥ १२॥

राघवस्य विलापं च गृध्रराजनिबर्हणम् ।
कबन्धदर्शनं चैव पम्पायाश्चापि दर्शनम् ॥ १३॥

शर्बर्या दर्शनं चैव हनूमद्दर्शनं तथा ।
विलापं चैव पम्पायां राघवस्य महात्मनः ॥ १४॥

ऋष्यमूकस्य गमनं सुग्रीवेण समागमम् ।
प्रत्ययोत्पादनं सख्यं वालिसुग्रीवविग्रहम् ॥ १५॥

वालिप्रमथनं चैव सुग्रीवप्रतिपादनम् ।
ताराविलापसमयं वर्षरात्रिनिवासनम् ॥ १६॥

कोपं राघवसिंहस्य बलानामुपसङ्ग्रहम् ।
दिशः प्रस्थापनं चैव पृथिव्याश् च निवेदनम् ॥ १७॥

अङ्गुलीयकदानं च ऋक्षस्य बिलदर्शनम् ।
प्रायोपवेशनं चैव सम्पातेश्चापि दर्शनम् ॥ १८॥

पर्वतारोहणं चैव सागरस्य च लङ्घनम् ।
रात्रौ लङ्काप्रवेशं च एकस्यापि विचिन्तनम् ॥ १९॥

आपानभूमिगमनमवरोधस्य दर्शनम् ।
अशोकवनिकायानं सीतायाश्चापि दर्शनम् ॥ २०॥

अभिज्ञानप्रदानं च सीतायाश्चापि भाषणम् ।
राक्षसीतर्जनं चैव त्रिजटास्वप्नदर्शनम् ॥ २१॥

मणिप्रदानं सीताया वृक्षभङ्गं तथैव च ।
राक्षसीविद्रवं चैव किङ्कराणां निबर्हणम् ॥ २२॥

ग्रहणं वायुसूनोश्च लङ्कादाहाभिगर्जनम् ।
प्रतिप्लवनमेवाथ मधूनां हरणं तथा ॥ २३॥

राघवाश्वासनं चैव मणिनिर्यातनं तथा ।
सङ्गमं च समुद्रस्य नलसेतोश् च बन्धनम् ॥ २४॥

प्रतारं च समुद्रस्य रात्रौ लङ्कावरोधनम् ।
विभीषणेन संसर्गं वधोपायनिवेदनम् ॥ २५॥

कुम्भकर्णस्य निधनं मेघनादनिबर्हणम् ।

रावणस्य विनाशं च सीतावाप्तिमरेः पुरे ॥ २६ ॥

बिभीषणाभिषेकं च पुष्पकस्य च दर्शनम् ।
अयोध्यायाश्च गमनं भरतेन समागमम् ॥ २७ ॥

रामाभिषेकाभ्युदयं सर्वसैन्यविसर्जनम् ।
स्वराष्ट्ररञ्जनं चैव वैदेह्याश् च विसर्जनम् ॥ २८ ॥

अनागतं च यत्किं चिद्रामस्य वसुधातले ।
तच्चकारोत्तरे काव्ये वाल्मीकिर्भगवानृषिः ॥ २९ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com